# अथ श्रीरघूत्तमगुरुस्तोत्रम्

गम्भीराशयगुम्भसम्भृतवचःसन्दर्भगर्भोल्लसत्-
टीकाभावविबोधनाय जगतां यस्यावतारोऽजनि ।
तत्तादृक्षदुरन्तसन्तततपःसन्तानसन्तोषित-
श्रीकान्तं सुगुणं रघूत्तमगुरुं वन्दे परं देशिकम् ॥१॥

सच्छास्त्रामलभावबोधकिरणैः संवर्धयन् मध्वसत्-
सिद्धान्ताब्धिमनन्तशिष्यकुमुदव्रातं विकासं नयन् ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयम् ॥२॥

उद्यन्मार्तण्डसङ्काशं दण्डमालाकमण्डलून् ।
धरं कौपीनसूत्रं च सीताराघवमानसम् ॥३॥

श्रीनिवासेन वन्द्याङ्घ्रिं तुलसीदामभूषणम् ।
ध्यायेद्रघूत्तमगुरुं सर्वसौख्यप्रदं नृणाम् ॥४॥

रघूत्तमगुरुं नौमि शान्त्यादिगुणमण्डितम् ।
रघूत्तमपदद्वन्द्वकञ्जभृङ्गायितान्तरम् ॥५॥

रघूत्तमगुरुं वन्दे रघूत्तमपदार्चकम् ।
गाम्भीर्येणार्थबाहुल्यटीकातात्पर्यबोधकम् ॥६॥

भावबोधकृतं नौमि भावभावितभावुकम् ।
भावभाजं भावजादिपरीभावपरायणम् ॥७॥

सन्न्यायविवृतेष्टीकाशेषसम्पूर्णकारिणम् ।
टीकां दृष्ट्वा पेटिकानां निचयं च चकार यः
प्रमेयमणिमालानां स्थापनाय महामतिः ॥८॥

यच्छिष्यशिष्यशिष्याद्याष्टिप्पण्याचार्यसंज्ञिताः ।
तमलं भावबोधार्थं भूयो भूयो नमाम्यहम् ॥९॥

शुकेन शान्त्यादिषु वाङ्मयेषु व्यासेन धैर्येऽम्बुधिनोपमेयम् ।
मनोजजित्यां मनसां हि पत्या रघूत्तमाख्यं स्वगुरुं नमामि ॥१०॥

राम राम तव पादपङ्कजं चिन्तयामि भवबन्धमुक्तये ।
वन्दितं सुरनरेन्द्रमौलिभिर्ध्यायते मनसि योगिभिः सदा ॥११॥

पिनाकिनीरसञ्जुष्टदेशे वासमनोरमम् ।
पिनाकिपूज्यश्रीमध्वशास्त्रवार्धिनिशाकरम् ॥१२॥

पञ्चकैर्भावबोधाख्यैर्ग्रन्थैः पञ्चलसन्मुखैः ।
तत्त्वविज्ञापकैः स्वानामुपमेयं पिनाकिना ॥१३॥

गाम्भीर्ये सर्वदुर्वादिगिरिपक्षविदारणे ।
विषयेषु विरागित्वे चोपमेयं पिनाकिना ॥१४॥

धरणे भगवन्मूर्तेर्भरणे भक्तसन्ततेः ।
विना विना चोपमेयं मेयं तत्त्वप्रकाशने ॥१५॥

गुरुत्वेऽखिललोकानां प्रदानेऽभीष्टसन्ततेः ।
शिष्येभ्यस्तत्त्वविज्ञानप्रदाने परमं गुरुम् ॥१६॥

सदाररामपादाब्जसदारतिसुधाकरम् ।
सदाऽरिभेदने विष्णुगदारिसदृशं सदा ॥१७॥

रघुनाथाङ्घ्रिसद्भक्तौ रघुनाथानुजायितम् ।
रघुनाथार्यपाण्युत्थरघुवर्यकरोदितम् ॥१८॥

वेदेशार्चितपादाब्जं वेदेशाङ्घ्र्यब्जपूजकम् ।
रघूत्तमगुरुं वन्दे रघूत्तमपदार्चकम् ॥१९॥

रघूत्तमगुरुस्तोत्रस्याष्टकं यः पठेन्नरः ।
रघूत्तमप्रसादाच्च स सर्वाभीष्टभाग्भवेत् ॥२०॥

यद्वृन्दावनपूर्वतः फलवती धात्री जगत्पावनी
याम्यायां तु पिनाकिनी चलदलो मूर्तित्रयाधिष्ठितः ।
वारुण्यां दिशि वामतः प्रतिकृतौ छायाकृता तिन्त्रिणी
तद्वृन्दावनमध्यगो गुरुवरो भूयात् स नः श्रेयसे ॥२१॥

प्रणमत्कामधेनुं च भजत्सुरतरूपमम् ।
श्रीभावबोधकृत्पादचिन्तामणिमुपास्महे ॥२२॥

॥ इति श्रीरघूत्तमगुरुस्तोत्रम् ॥